हृताः। महापातकिनो ये च पतितास्ते प्रकीर्तिताः। पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः। न चाश्रुपातः पिण्डो वा कार्यं श्राद्धादिकं क्वचित्। एतानि पतितानां तु यः करोति विमोहितः। तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा"।

तत्र दुर्मरणनिमित्तं दानादि तत्रोक्तं यथा

"तत्र दुर्मरणनिमित्तं दानादिकार्यं तच्च विश्वप्रकाशादौ दर्शितं यथा

शातातपीये च "व्याघ्रेण निहते विप्रैर्विप्रकन्यां विवाहयेत्। सर्पदष्टे नागबलिर्देयः सर्पश्च काञ्चनः। चतुर्निष्कमितं हैमं गजं दद्याद्गजैर्हते। राज्ञा विनिहते दद्यात् पुरुषं तु हिरण्मयम्। चौरेण निहते धेनुं वैरिणा निहते वृषम्। वृषेण निहते दद्याद्वृषं यथाशक्त्या तु काञ्चनम्। शय्यामृते प्रदातव्या शय्या तूलीसमन्विता। निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता। शौचहीने मृते चैव द्विनिष्कं स्वर्णजं हरिम्। संस्कारहीने च मृते कुमारमुपनाययेत्। निष्कत्रयस्वर्णमितं दद्यादश्वं हयाहते। शुना हते क्षेत्रपालं स्थापयेन्निजशक्तितः। शूकरेण हते दद्यान्महिषं दक्षिणान्वितम्। कृमिभिश्च मृते दद्याद्गोधूमान् पञ्चखारिकाः। वृक्षं वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतम्। शकटेन हते दद्याद्द्रव्यं सोपस्करान्वितम्। भृगुपातमृते चैव प्रदद्याद्धान्यपर्वतम्। अग्निना निहते कार्यमुदपानं स्वशक्तितः। दारुणा निहते चैव कर्तव्या सदने सभा। शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्विताम्। अश्मना निहते दद्यात्सवत्सां गां पयस्विनीम्। विषेण च मृते दद्यान्मेदिनीं हेमनिर्मिताम्। उद्बन्धनेन च मृते वापीं कनकनिर्मितम्। मृते जलेन वरुणं हैमं दद्याद्द्विनिष्कजम्। विषूचिकामृते स्वादु भोजयेच्च शतं द्विजान्। घृतधेनुः प्रदातव्या कण्ठान्नकवले मृते। कासरोगेण च मृते अष्टकृच्छ्रं व्रतं चरेत्। अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत्। शाकिन्यादिग्रहग्रस्ते जपेद्रुद्रं यथोदितम्। विद्युत्पातेन निहते विद्यादानं समाचरेत्। अन्तरिक्षमृते कार्यं वेदपारायणं तथा। सच्छास्त्रपुस्तकं दद्यादस्पृश्यस्पर्शतो मृते। पतिते च मृते कुर्यात् प्राजापत्यांस्तु षोडश। मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत्। एवं कृते विधाने तु विदध्यादौर्ध्वदेहिकम्"। अनन्तभट्टेन तु दुर्मरणप्रकाराश्चतुःषष्टिप्रकारा उक्तास्ते च तत्कृतान्त्येष्टिपद्धतौ द्रष्टव्याः।

**दुर्मर्ष** पु॰ दुःखेन मृष्यते दुर्+मृष–कर्मणि खल्। दुःखेन मर्षणीये दुःखेन सहनीये "यच्छु भूया दूमं कृवं दुर्मर्षं चक्रिया उत" ऋ॰ ८।४५।१८

**दुर्मर्षण** पु॰ दुर्+मृष–भाषायां खलं बाधित्वा युच्। १दुःखेन सहनीये २विष्णौ पु॰ "अजो दुर्मर्षणः शास्ता" विष्णुसं॰ मर्षितुं दानवादिभिर्न शक्यते इति दुर्मर्षणः" भा॰ ३धृतराष्ट्रपुत्रभेदे "दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः" भा॰आ॰६३॰ तत्पुत्रोक्तौ

**दुर्म(ल्ली)ल्लिका** स्त्री दृश्यकाव्यरूपे उपरूपकभेदे सा॰द॰यथा "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशोभाणिकेति च। अष्टादश प्राहुरुपरूपकाणि मनीषिणः। विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" इत्युद्दिश्य तल्लक्षणमुक्तं यथा "दुर्मल्ली चतुरङ्का स्यात् कौशिकी भारती तथा। अगर्भा नागरनरा न्यूननायकभूषिता। त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडामयो भवेत्। पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्। षण्नालिकस्तृतीयस्तु पीठमर्दविलासवान्। चतुर्थो दशनालिः स्यादङ्कः क्रीडितनायकः। यथा विन्दुमती"।

**दुर्मायु** त्रि॰ दुष्टान्यायुधानि मिन्वन्ति मि–क्षेपे उण्। दुष्टायुधक्षेपके "दुर्मायवो दुरेवा मर्त्यासः" ऋ॰३।३०।१५

**दुर्मित्र** पु॰ दुष्टं मित्रम् प्रा॰स॰ अमित्रवत् पुंस्त्वम्। विरोधिलक्षणया १अमित्रे शत्रौ। दुःस्थितं मित्रं यस्य। २दुष्टमित्रके त्रि॰। "दुर्मित्रासः प्रकलविन् मिमानाः" ऋ॰७।१८।१५ स्त्रियां टाप्। दुर्मित्राया अपत्यम् बाह्वा॰ इञ्। दौर्मित्रि तदपत्ये पुंस्त्री॰

**दुर्मित्रिय** त्रि॰ दुर्मित्राय अमित्रत्वाय साधु घ। अमित्रत्वेनावस्थिते। "सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु" यजु॰६।२२। "दुर्मित्रिया अमित्रत्वेनावस्थिताः" वेददी॰

**दुर्मिलका** स्त्री मात्रावृत्तभेदे यथा "द्वात्रिंशन्मात्रं फणिपतिजल्पितसकलविभूषणवृत्तवरम् दशवसुभुवनैर्यतिरत्र प्रभवति कविकुलहृदयानन्दकरम्। यद्यष्टचतुष्कलगणनिर्मितपदमिति दुर्मिलकाऽऽख्यपदं नरपतिवरतोषणवन्दिविभूषणभुवनविदितसन्तापहरम्"।